### (3) प्रहर्षिणी

Def. म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ।
Sch. G. म, न, ज, र, ग ( 3. 10 )
Ex. ते रेखाध्वजकुलिशातपत्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम् ।
प्रस्थानप्रणतिभिरंगुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरंदरेणुगौरम् ॥ R. 4. 88.
See Ki. 7, Si. 8.

### (4) मंजुभाषिणी

( Also called सुनंदिनी and प्रबोधिता )

Def. सजसा जगौ च यदि मंजुभाषिणी ।
Sch. G. स, ज, स, ज, ग, ( 6. 7 )
Ex. यमुनामतीतमथ शुश्रुवानमुं
तपसस्तनूज इति नाधुनोच्यते ।
स यदाऽचलन्निजपुरादहर्निशं
नृपतेस्तदादि समचारि वार्तया ॥ Si. 13. 1.

### (5) मत्तमयूरी

Def. वेदैरंध्रैर्म्तौ यसगा मत्तमयूरः ।
Sch. G. म, त, य, स, ग ( 4. 9 )
Ex. दृष्ट्वा दृश्यान्याचरणीयानि विधाय
प्रेक्षाकारी याति पदं मुक्तमपायैः ।
सम्यग्दृष्टिस्तस्य परं पश्यति यस्त्वां
यश्चोपास्ते साधु विधेयं स विधत्ते ॥ Ki. 18. 28;
Si. 4. 44, 6. 76, also R. 9. 75.

### (6) रुचिरा

( Also called प्रभावती )

Def. जभौ सजौ गिति रुचिरा चतुर्ग्रहैः ।
Sch. G. ज, भ, स, ज, ग ( 4. 9 )
Ex. कदा मुखं वरतनु कारणादृते
तवागतं क्षणमपि कोपपात्रताम् ।
अपर्वणि ग्रहकलुषेंदुमंडला
विभावरी कथय कथं भविष्यति ॥ M. 4. 13.
See Bk. 1. 1, Si. 17.

*Metres with 14 Syllables in a quarter.*

## ( शक्वरी )

### (1) अपराजिता

Def. ननरसलघुगैः स्वरैरपराजिता ।
Sch. G. न, न, र, स, ल, ग ( 7. 7 )
Ex. यदनवधिभुजप्रतापकृतास्पदा
यदुनिचयचमूः परैरपराजिता ।
व्यजयत समरे समस्तरिपुव्रजं
स जयति जगतां गतिर्गरुडध्वजः ॥

### (2) असंबाधा

Def. म्तौ न्सौ गावक्षग्रहविरतिरसंबाधा ।
Sch. G. म, त, न, स, ग, ग ( 5. 9 )
Ex. वीर्याग्नौ येन ज्वलति रणवशात्क्षिप्ते
दैत्येंद्रे जाता धरणिरियमसंबाधा ।
धर्मस्थित्यर्थं प्रकटिततनुसंबंधः
साधूनां बाधां प्रशमयतु स कंसारिः ॥

### (3) पथ्या

( Also called मंजरी )

Def. सजसा यलौ च सह गेन पथ्या मता ।
Sch. G. स, ज, स, य, ल, ग ( 5. 9 )
Ex. स्थगयंत्यमूः शमितचातकार्तस्वरा
जलदास्तडित्तुलितकांतकार्तस्वराः ।
जगतीरिह स्फुरितचारुचामीकराः
सवितुः क्वचित्कपिशयंति चामी कराः ॥
Si. 4. 24.

### (4) प्रमदा ( also called कुररीरुता । )

Def. नजभजला गुरुश्च भवति प्रमदा ।
Sch. G. न, ज, भ, ज, ल, ग ( 6. 8 )
Ex. अनतिचिरोज्झितस्य जलदेन चिर-
स्थितबहुबुद्बुदस्य पयसोऽनुकृतिम् ।
विरलविकीर्णवज्रशकला सकला-
मिह विदधाति धौतकलधौतमही ॥ Si. 4. 41.

### (5) प्रहरणकलिका.

Def. ननभनलगिति प्रहरणकलिका ।
Sch. G. न, न, भ, न, ल, ग ( 7. 7 )
Ex. व्यथयति कुसुमप्रहरणकलिका
प्रमदवनभवा तव धनुषि तता ।
विरहविपदि मे शरणमिह ततो
मधुमथनगुणस्मरणमविरतम् ॥

### (6) मध्यक्षामा

( Also called हंसश्येनी or कुटिल )

Def. मध्यक्षामा युगदशविरमा म्भौ न्यौ गौ ।
Sch. G. म, भ, न, य, ग, ग ( 4. 10 )
Ex. नीतोच्छ्रायं मुहुरशिशिररश्मेरुस्रै-
रानीलाभैर्विरचितपरभागा रत्नैः ।
ज्योत्स्नाशंकामिह वितरति हंसश्येनी
मध्येऽप्यह्नः स्फटिकरजतभित्तिच्छाया ॥ Ki.5. 31

### (7) वसंततिलका

( Also called वसंततिलक
उद्धर्षिणी, सिंहोन्नता )

Def. उक्ता वसंततिलका तभजा जगौ गः ।
Sch. G. त, भ, ज, ज, ग, ग ( 8. 6 )
Ex. यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतारुणपुरःसर एकतोऽर्कः ।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशांतरेषु ॥ S. 4. 1.

### (8) वासंती.

Def. मात्तौ नो मो गौ यदि गदिता वासंतीयम् ।
Sch. G. म, त, न, म, ग, ग ( 4. 6. 4 )
Ex. भ्राम्यद्भृंगीनिर्भरमधुरालापोद्गीतैः
श्रीखंडाद्रेरद्भुतपवनैर्मंदांदोला ।
लीलालोला पल्लवविलसद्धस्तोल्लासैः
कंसारातौ नृत्यति सदृशी वासंतीयम् ॥

*Metres with 15 Syllables in a quarter.*

## ( अतिशक्वरी )

### (1) तूणक.

Def. तूणकं समानिका पदद्वयं विनांतिमम् ।